
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

दाखल अंक	शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
M·2599	पदपाठ ~~यजु~~ शु यजुर्वेद	-	वेदांग	अपूर्ण	"	३/९	100	संस्कृत	कागद				

पयग्रामहाः ॥१३॥ अर्द्धृचैरुक्थानां रूपं पदैराप्नोति निविदः ॥ प्रणवैः श
स्त्राणां रूपं पयसा सोम आप्यते ॥१४॥ अश्विभ्यां प्रातःसवनमिंद्रेणैं
द्रं माध्यंदिनं ॥ वैश्वदेवं सरस्वत्या तृतीयमाप्तं सवनं ॥१५॥ वाय
स्रा॰ ८ व्यैर्वायव्यान्याप्नोति सतेन द्रोणकलशं ॥ कुंभीभ्यामंभृणौ सुते स्था
॥३॥ ली स्थालीराप्नोति ॥१६॥ यजुर्भिराप्यंते ग्रहा ग्रहैः स्तोमाश्च विष्टुतीः ॥ छंदो
भिरुक्थाशस्त्राणि साम्नावभृथ आप्यते ॥१७॥ इडाभिर्भक्षानाप्नो
ति सूक्तवाकेनाशिषः ॥ शंयुना पत्नीसंयाजान्त्समिष्टयजुषा संस्थां
॥१८॥ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणां ॥ दक्षिणा श्रद्धामा

प्नोति श्रद्धया सत्यमाप्यते॥१९॥ एतावद्रूपं। यज्ञस्य यद्देवैर्ब्रह्मणा कृतम्॥ तदेतत्स
र्वमाप्नोति यज्ञे सौत्रामणी सुते॥२०॥ ऽश्विनी योनुवाकः॥ सुरावंतं बर्हिषदं२ सुवी
रं यज्ञ२ हिन्वंति महिषा नमोभिः॥ दधानाः सोमं दिवि देवतासु मदेमेंद्रं यज
मानाः स्वर्काः॥४॥१॥ यस्ते। रसः संभृत ओषधीषु सोमस्य शुष्मः सुरया सुतस्य॥
तेन जिन्व यजमानं मदेन सरस्वतीमश्विनाऽऽइंद्रमग्निम्॥२॥ यमश्विना॥ नमु
चेरासुरादधि सरस्वत्यसुनोदिंद्रियाय॥ इमं तं शुक्रं मधुमंतमिंदुं सो
मं राजानमिह भक्षयामि॥३॥ यदत्र। रिप्तं रसिनः सुतस्य यदिंद्रोऽअपिब
च्छचीभिः॥ अहं तदस्य मनसा शिवेन सोमं राजानमिह भक्षयामि॥४॥ [illegible]

पुनंतुमा २

पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः ॥ प्रपितामहेभ्यः स्व
धायिभ्यः स्वधानमः ॥५॥ अक्षन्पितरोऽमीमदंतपितरोऽतीतृपंतपितरः ॥ पितरः शुंधध्वं ॥६॥
पुनंतुमा पितरः सोम्यासः पितामहाः पुनंतुप्रपितामहाः ॥ पवित्रेण शतायुषा ॥ ॥ पुनं
तुमा पितामहाः पुनंतुप्रपितामहाः ॥ पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै ॥ ८ ॥ अ
ग्नऽआयूंषि पवसऽआसुवोर्जमिषंचनः ॥ आरेबाधस्वदुच्छुनाम् ॥ ९ ॥ पुनंतुमा
॥६॥ देवजनाः पुनंतु मनसाधियः ॥ पुनंतु विश्वाभूतानि जातवेदः पुनीहिमा ॥ १० ॥ पवित्रे ॥६॥
णपुनीहिमाशुक्रेणदेवदीद्यत् ॥ अग्नेक्रत्वाक्रतूँ२ रनु ॥ ११ ॥ यत्तेपवित्रमर्चिष्य
ग्नेविततमंतरा ॥ ब्रह्मतेनपुनातुमा ॥ १२ ॥ पवमानः सोऽअद्यनः पवित्रेणविचर्षे

पिः॥ यः पोता स पुनातु मा॥१३॥ उभाभ्यां देव सवितः पवित्रेण सवेन च॥ मां पुनीहि विश्वतः॥
॥१४॥ वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः॥ तया मदन्तः सध
मादेषु वयᳪस्याम पतयो रयीणाम्॥१५॥ ये समानाः। समनसः पितरो यमराज्ये॥
तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पताम्॥१६॥ ये समानाः समनसो जीवा जीवेषु मा
मकाः॥ तेषाᳪश्रीर्मयि कल्पतामस्मिँल्लोके शतᳪसमाः॥१७॥ द्वे सृती ऽअशृणवं पितॄ
णामहं देवानामुत मर्त्यानाम्॥ ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं च॥१८॥
इदᳪहविः प्रजननं मे ऽअस्तु दशवीरᳪसर्वगणᳪस्वस्तये॥ आत्मसनि प्रजासनि
पशुसनि लोकसन्यभयसनि॥ अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतो ऽअस्मासु ध

न॥१९॥ ततीयोनुवाकः॥७॥ उदीरतामवरऽउत्परासऽउन्मध्यमाः पितरः सोम्यासः। असुं
यऽईयुरवृकाऽऋतज्ञास्तेनोवन्तु पितरो हवेषु॥१॥ त्वꣳ सोमप्रचिकितो मनीषात्वꣳ र
जिष्ठमनुनेषिपन्थां॥ तव प्रणीती पितरो नऽइन्दो देवेषु रत्नमभजन्त धीराः॥२॥ त्वया
हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः। वन्वन्नवातः परिधीꣳरपोर्णु वीरे ॥८॥
॥८॥ भिरश्वैर्मघवा भवा नः॥३॥ त्वꣳ सोम पितृभिः संविदानो नु द्यावापृथिवीऽआतत
थ॥ तस्मै तऽइन्दो हविषा विधेम वयꣳ स्याम पतयो रयीणाम्॥४॥ बर्हिषदः पितरऽऊत्य
र्वागिमा वो हव्या चकृमा जुषध्वं तऽआगतावसा शन्तमेनाथा नः शंयोररपो दधात॥५॥
ऽउपहूताः पितरः सोम्यासो [illegible]ष्येषु निधिषु प्रियेषु॥ तऽआगमन्तु तऽइह श्रुवन्त्वधि
ब्रुव
१५

ध्रुवं तु नैवं च स्मान् ॥२॥ आहं पितॄन्त्सुविदत्रां अविवित्सि नपातं च विक्रमणं च विष्णोः ॥
बर्हिषदो ये स्वधया सुतस्य भजंतं ऽइहागमिष्ठाः ॥३॥ अग्निष्वात्ताः पितर एह ग
च्छत सदः सदः सदत सुप्रणीतयः ॥ अत्ता हवींषि प्रयतानि बर्हिष्यथा रयिं सर्व
६४ वीरं दधातन ॥४॥ आयंतु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः ॥ अ
स्मिन्यज्ञे स्वधया मदंतोऽधिब्रुवंतु नैवं च स्मान् ॥५॥ ये अग्निदग्धा ये अनग्नि
दग्धा मध्ये दिवः स्वधया मादयंते ॥ तेभ्यः स्वराळसुनीतिमेतां यथावशं तन्वं क
ल्पयाति ॥६॥ अग्निष्वात्तानृतुमतो हवामहे नाराशंसे सोमपीथं य आ
शुः ॥ ते नो विप्रासः सुहवा भवंतु वयं स्याम पतयो रयीणाम् ॥७॥ आच्या जा

नु दक्षिणतो निषद्येमं यज्ञमभिगृणीत विश्वे ॥ माहिंसिष्ट पितरः केन चिन्नो यद्व आ
गः पुरुषता करोम ॥२॥ आसीनासो अरुणीनां ॥ मुपस्थे रयिं धत्त दासुषे मर्त्याय ॥
पुत्रेभ्यः पितरस्तस्य वस्वः प्रयच्छत त इहोर्जं दधात ॥३॥ यमग्ने । कव्यवाहन त्वं
॥६॥ चिन्मन्यसे रयिं ॥ तन्नो गीर्भिः श्रवाय्यं देवत्रा पनया युजं ॥४॥ यो अग्निः । कव्य
वाहनः पितॄन्यक्षदृतावृधः ॥ प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्य आ ॥५॥ त्वम ॥
ग्न ईळितो जातवेदो वाड्ढव्यानि सुरभीणि कृत्वी ॥ प्रादाः पितृभ्यः स्वधया ते अक्षं
न्नद्धि त्वं देव प्रयता हवींषि ॥६॥ इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास
ईयुः ॥ ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु विक्षु ॥७॥ ये चेह पितरो

स्व

य च नेह यांश्च विद्म यां२ उ च न प्रविद्म॥ त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञं सुकृ
तं जुषस्व॥६८॥ अधा यथा नः पितरः परासः प्रत्नासो ऽअग्न ऽऋतमाशुषाणाः॥ शुची
दयं दीधितिमुक्थशासः क्षामा भिंदंतो ऽअरुणीरप व्रन्॥६९॥ उशंतस्त्वा निधीमह्यु
शंतः समिधीमहि॥ उशन्नुशत ऽआ वह पितॄन्हविषे ऽअत्तवे॥७०॥ अपां फेनेन नमु
चेः शिर ऽइंद्रोदवर्तयः॥ विश्वा यदजय स्पृधः॥७१॥ ॥७॥ ॥ सोमो राजामृतꣳ सुत ऽऋ
दा जीषेणाजहान्मृत्युम्॥ ऋतेन सत्यमिंद्रियं विपानꣳ शुक्रमंधस ऽइंद्रस्येंद्रियमिदं
पयोमृतं मधु॥७२॥ अद्भ्यः क्षीरं व्यपिबत्क्रुङ्ङांगिरसो धिया॥ ऋतेन सत्यमिंद्रियं विपा
नꣳ शुक्रमंधस ऽइंद्रस्येंद्रियमिदं पयोमृतं मधु॥७३॥ सोममद्भ्यो व्यपिबच्छंदसा हंसः
शुचिषत्॥ ऋतेन सत्यमिंद्रियं विपानꣳ शुक्रमंधस ऽइंद्रस्येंद्रियमिदं पयोमृतं

मेधु॥४॥ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिब क्षत्रं पयः सोमं प्रजापतिः॥ ऋतेन सत्यमिंद्रि
यं विपानं४ शुक्रमंधस ऽइंद्रस्येंद्रियमिदं पयोमृतं मधु॥५॥ रेतो मूत्रं विजहाति योनिं
प्रविशदिंद्रियम्॥ गर्भो जरायुणावृत उल्बं जहाति जन्मना॥ ऋतेन सत्यमिंद्रियं वि
पानं४ शुक्रमंधस ऽइंद्रस्येंद्रियमिदं पयोमृतं मधु॥६॥ दृष्ट्वा रूपे व्याकरोत्सत्यानृ
॥७॥ ते प्रजापतिः॥ अश्रद्धामनृतेदधाछ्रद्धां सत्ये प्रजापतिः॥ ऋतेन सत्यमिंद्रियं विपा ॥७॥
नं४ शुक्रमंधस ऽइंद्रस्येंद्रियमिदं पयोमृतं मधु॥७॥ वेदेन रूपे व्यपिब सुतासुतो
प्रजापतिः॥ ऋतेन सत्यमिंद्रियं विपानं४ शुक्रमंधस ऽइंद्रस्येंद्रियमिदं पयोमृतं
मधु॥८॥ दृष्ट्वा परिस्रुतो रसं४ शुक्रेण शुक्रं व्यपिब पयः सोमं प्रजापतिः॥ ऋतेन

सस्मिंद्रियं विपानः सुत्रामं धत्तां इंद्र स्येंद्रियमिहं पपोमत्तं मधु ॥ ॥ ७॥ सोस न तं
प्र३ त्रं मनस्वा मनीषिणः ऊर्णा सूत्रेण कवयो वयंति ॥ अश्विना यज्ञं सविता सरस्वती
इंद्रस्य रूपं वरुणो भिषज्यन् ॥ ॥ तदस्य रूपममृतं शची भिस्तिस्रो दधुर्देवताः
संरराणाः ॥ लोमानि शष्पैर्बहुधा न तोक्मभिस्त्वगस्य मांसमभवन्न लाजाः ॥ ॥
तदश्विना भिषजा रुद्रवर्तनी सरस्वती वयति पेशो अंतरम् ॥ अस्थि मज्जानं मा
सैरैः कारोतरेण दधतो गवां त्वचि ॥ १०॥ सरस्वती मनसा पेशलं वसु नासत्याभ्यां
वयति दर्शतं वपुः ॥ रसं परिस्रुता न रोहितं नग्नहुर्धीरस्तसरं न वेम ॥ ११॥ पयसा शु
क्रममृतं जनित्रं सुरया मूत्राज्जनयंत रेतः ॥ अपामतिं दुर्मतिं बाधमाना ऊवध्यं

वा न इं सखं तहाराव्॥५॥ इंद्रः सुत्रामा हृदयेन सत्यं पुरोळाशेन सविता जजान॥ यकृ
त्क्लोमानं वरुणो भिषज्यन्मतस्ने वायव्यैर्न मिनाति पित्तम्॥६॥ आंत्राणि स्थाली
र्मधु पिन्वमाना गुदाः पात्राणि सुदुघा न धेनुः॥ श्येनस्य पत्रं न प्लीहा शचीभिरासंदी
नाभिरुदरं न माता॥७॥ कुंभो वनिष्ठुर्जनिता शचीभिर्यस्मिन्नग्रे योन्यां गर्भो अंतः॥
॥८॥ प्लाशिर्व्यक्तः शतधार उत्सो दुहे न कुंभी स्वधां पितृभ्यः॥८॥ मुखं सदस्य शिर ॥८॥
इत्सतेन जिह्वा पवित्रमश्विनासन्त्सरस्वती॥ चप्यं न पायुर्भिषगस्य वालो व
स्तिर्न शेपो हरसा तरस्वी॥९॥ अश्विभ्यां चक्षुरमृतं ग्रहाभ्यां छागेन तेजो हवि
षा शृतेन॥ पक्ष्माणि गोधूमैः कुवलैरुतानि पेशो न शुक्रमसितं वसाते॥१०॥ अश्वि
नर

न्नं। मेषो न सिवीर्यीय प्राणस्य पंथा ऽअमृतो ग्रहाभ्याम्॥ सरस्वत्युपवाकैर्व्यानं
नस्यानि बर्हिर्बदरैर्जजान॥११॥ इंद्रस्य रूपामृषभो बलाय कर्णाभ्यांश्श्रोत्रममृ
तं ग्रहाभ्याम्॥ यवा न बर्हिर्भ्रुवि केसराणि कर्कंधुर्जज्ञे मधु सारघं मुखात्॥१२॥ आ
त्मन्नुपस्थे न वृकस्य लोम मुखे श्मश्रूणि न व्याघ्रलोम॥ केशा न शीर्षन्यशसे श्रियै
शिखा सिंहस्य लोम त्विषिरिंद्रियाणि॥१३॥ अंगान्यात्मन् भिषजा तदश्विना
त्मानमंगैः समधात्सरस्वती॥ इंद्रस्य रूपंश्शतमानमायुश्चंद्रेण ज्योतिरमृतं दधा
नाः॥१४॥ सरस्वती योन्यां गर्भमंतरश्विभ्यां पत्नी सुकृतं बिभर्ति॥ अपांरसेन
वरुणो न साम्नेंद्रंश्श्रियै जनयन्नप्सु राजा॥१५॥ तेजः पशूनांश्हविरिंद्रियावत्

स्तुतापयसासारघंमधु॥ अश्विभ्यांदुग्धंभिषजासरस्वत्यासुतासुताभ्याममृतः
सोमऽइंदुः॥९५॥ ७॥ क्षत्रस्यनाभिरसि क्षत्रस्ययोनिरसि॥ मात्वाहिंसीन्मा
माहिंसीः॥ निषसादधृतव्रतोवरुणःपस्त्यास्वा॥ साम्राज्यायसुक्रतुः॥ मृत्योः
पाहिविद्योत्पाहि॥ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम्॥१॥
॥२॥ अश्विनोर्भैषज्येनतेजसेब्रह्मवर्चसायाभिषिंचामिसरस्वत्यैभैषज्येनवीर्यायान्नाद्या
याभिषिंचामि॥ इंद्रस्येंद्रियेणबलायश्रियैयशसेभिषिंचामि॥२॥ कोसि। कतमोसि ॥२॥
कस्मैत्वाकायत्वा॥ सुश्लोकसुमंगलसत्यराजन्॥३॥ शिरोमेश्रीर्यशोमुखंत्विषिः
व॰२ केशाश्चश्मश्रूणि॥ राजामेप्राणोऽअमृतंसम्राट्चक्षुर्विराट्श्रोत्रम्॥४॥ जिह्वामे।भद्रं
वाङ्महोमनोमन्युःस्वराड्भामः॥ मोदाःप्रमोदाऽअंगुलीरंगानिमित्रंमेसहः॥५॥ बा

हुमे।बलमिंद्रियथ्ंहस्तौमेकर्मवीर्यम्॥आत्माक्षत्रमुरोमम॥६॥पृष्ठीर्मेराष्ट्रमुदर
मध्ंसौग्रीवाश्चश्रोणी॥ऊरूअरत्नीजानुनीविशोमेंगानिसर्वतः॥७॥नाभिर्मे
चित्तंविज्ञानंपायुर्मेपचितिर्भसत्॥आनंदनंदावांडौमेभगःसौभाग्यंपसः॥८॥
जंघाभ्यांपद्भ्यां॥धर्मोस्मिविशिराजाप्रतिष्ठितः॥प्रतिक्षत्रेप्रतितिष्ठामिराष्ट्रे॥
प्रत्यश्वेषुप्रतितिष्ठामिगोषु॥९॥प्रत्यंगेषुप्रतितिष्ठाम्यात्मन्प्रतिप्राणेषुप्रति
तिष्ठामिपुष्टे॥प्रतिद्यावापृथिव्योःप्रतितिष्ठामियज्ञे॥१०॥त्रयादेवाएकादश
त्रयस्त्रिंशाःसुराधसः॥बृहस्पतिपुरोहितादेवस्यसवितुःसवे॥देवादे
वैरवंतुमा॥११॥प्रथमाद्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाःसत्येन॥सत्यंयज्ञे

नेमुह्णोयहुर्विर्विज्ञ्ह्रं खिसामभिः॥१२॥सामीन्द्रु ग्मि ज्ञ्ह्रे वैः पुरोनुवाक्यांभिष्पु
रोनुवाक्यायाज्याभिर्याज्यांदववहूारैः॥ वषट्कारऽआहुतीभिराहुतयोमेकामा
न्समर्द्धयंतुभूः स्वाहा॥१३॥लोमानिप्रयतिर्मम त्वङ्मऽआनतिरागतिः॥मांसंम
ऽउपनतिर्वस्वस्थिमज्जामऽआनतिः॥१४॥४॥ ॥स्वाहीद्यो११देवायज्ञो२०सुरावं
१०॥ तं१२ वीरता२१ सोमोराज्ञा९सीसेनतंत्रो धाक्षत्रस्यनाभि१४ इतिएकविंशतिमोध्या ॥१०॥
यः॥ ॥सप्तानुवाकेषु७॥ ॥ ७॥ ॥७म्॥ ॥ यद्देवादेवहेळनंदेवासश्चकृ
मावयम्॥अग्निर्मातस्मादेनसोविश्वान्मुंचत्वंहसः॥१॥यदिदिवायदिनक्त
मेनांसिचकृमावयम्॥वायुर्मातस्मादेनसोविश्वान्मुंचत्वंहसः॥२॥यदिजा

ग्राद्यदि स्वप्नऽएनांसि चकृमा वयम्॥ सूर्यो मा तस्मादेनसो विश्वान्मुंचत्वंहसः॥३॥
यद्ग्रामे यदरण्ये यत्सभायां यदिंद्रिये॥ यच्छूद्रे यदर्ये यदेनश्चकृमा वयम्॥ यदेकस्याधि ध
र्मणि तस्यावयजनमसि॥ यदापोऽअघ्न्याऽइति शपामहे ततो वरुण नो मुंच॥ अवभृथ
निचुंपुण निचेरुरसि निचुंपुणः॥ अव देवैर्देवकृतमेनोऽयक्ष्यव मर्त्यैर्मर्त्यकृतं पुरुराव्णो
देव रिषस्पाहि॥ समुद्रे ते हृदयमप्स्वंतः सं त्वा विशंत्वोषधीरुतापः॥ सुमित्रिया नऽआपऽओ
षधयः संतु दुर्मित्रियास्तस्मै संतु॥ योऽस्मान्द्वेष्टि यं च वयं द्विष्मः॥४॥ द्रुपदादिव मुमुचा
नः स्विन्नः स्नातो मलादिव॥ पूतं पवित्रेणेवाज्यमापः शुंधंतु मैनसः॥५॥ उद्वयं तम
सस्परि स्वः पश्यंत उत्तरम्॥ देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्॥६॥ अपोऽअ
द्यान्वचारिषं रसेन समसृक्ष्महि॥ पयस्वानग्नऽआगमं तं मा संसृज वर्च

साप्रजयासुधनेनच॥ए यो अस्यविष्ठीमहिंस्यमिदंसितज्ञोसितेओमधिधेहि॥७॥समावव
र्तिपृथिवीसमुषाःसमुसूर्यः॥सनुविश्वमिदंजगत्॥वैश्वानरज्योतिर्भूयासंविभून्का
मान्व्यश्नवैभूःस्वाहा॥८॥अस्यादधानिसमिधमग्नेव्रतपतेत्वयि॥व्रतंचश्रद्धांचो
पैमीधेत्वादीक्षितोऽअहम्॥९॥यत्रब्रह्मचक्षत्रंचसम्यंचौचरतःसह॥तंलोकंपुण्यंप्र
ज्ञेषंयत्रदेवाःसहाग्निना॥१०॥यत्रेंद्रश्चवायुश्चसम्यंचौचरतःसह॥तंलोकंपुण्यंप्र
॥११॥ ज्ञेषंयत्रसेदिर्नविद्यते॥११॥अंशुनातेऽअंशुःपृच्यतांपरुषापरुः॥गंधस्तेसोम ॥११॥
मवतुमदायरसोऽअच्युतः॥१२॥सिंचंतिपरिषिंचंत्युत्सिंचंतिपुनंतिच॥सुरायैब
भ्रवैमदेकिंत्वोवदतिकिंत्वः॥१३॥धानावंतंकरंभिणमपूपवंतमुक्थिनम्॥इंद्रप्रातर्जु
षस्वनः॥१४॥बृहदिंद्रायगायतमरुतोवृत्रहंतमम्॥येनज्योतिरजनयन्नृतावृधो

हं वे देवा यज्ञाम विगाता। अध्वर्यो ऽअद्रिभिः सुतꣳ सोमं पवित्र आनय। पुनाहींद्राय
पातवे॥३१॥ यो भूतानामधिपतिर्यस्मिंल्लोका ऽअधिश्रिताः॥ य ऽईशे महतो महा
ꣳस्तेन गृह्णामि त्वामहं मयि गृह्णामि त्वामहम्॥३२॥ उपयामगृहीतोस्यश्विभ्यां
त्वा सरस्वत्यै त्वेंद्राय त्वा सुत्राम्णे॥ एष ते योनिरश्विभ्यां त्वा सरस्वत्यै त्वेंद्राय
त्वा सुत्राम्णे॥३३॥ प्राणपा मे ऽअपानपाश्चक्षुष्पाः श्रोत्रपाश्च मे॥ वाचो मे वि
श्वभेषजो मनसो ऽसि विलायकः॥३४॥ अश्विनकृतस्य ते सरस्वतिकृतस्येंद्रेण
सुत्राम्णा कृतस्य॥ उपहूत ऽउपहूतस्य भक्षयामि॥३५॥ समिद्ध ऽइंद्र ऽउषसाम
नीके पुरोरुचा पूर्वकृद्वावृधानः॥ त्रिभिर्देवैस्त्रिꣳशता वज्रबाहुर्जघान वृ

४१

त्रंविदुरीयवारा॥२१॥ नराशंसः प्रतिशूरोमिमानस्तनूनपात्प्रतियज्ञस्यधाम॥ गो
भिर्वपावान्मधुनासमंजन्हिरण्यैश्चंद्रीयजतिप्रचेताः॥२२॥ ईळितोदेवैर्हरिवां३
अभिष्टिराजुह्वानोहविषाशर्धमानः॥ पुरंदरोगोत्रभिद्वज्रबाहुरायातुयज्ञमु
पनोजुषाणः॥२३॥ जुषाणोबर्हिर्हरिवान्नइंद्रः प्राचीनंसीदत्प्रदिशापृथिव्याः॥
उरुप्रथाःप्रथमानंस्योनमादित्यैरक्तंवसुभिःसजोषाः॥२४॥ इंद्रंदुरःकव
॥१२॥ ष्योधावमानावृषाणंयंतुजनयःसुपत्नीः॥ द्वारोदेवीरभितोविश्रयंतांसु ॥१२
वीरावीरंप्रथमानामहोभिः॥२५॥ उषासानक्ता॥ बृहतीबृहंतंपयस्वती
सुदुघेशूरमिंद्रम्॥ तंतुंततंपेशसासंवयंतीदेवानांदेवंयजतःसुरुक्मे॥२६॥

दैव्या मिमाना मनुषः पुरुत्रा होताराविंद्रं प्रथमा सुवाचा । मूर्द्धन्यज्ञस्य मधुना दधा
ना प्राचीनं ज्योतिर्हविषा वृधातः ॥४२॥ तिस्रो देवीर्हविषा वर्द्धमाना इंद्रं जुषाणा
जनयो न पत्नीः । अच्छिन्नं तंतुं पयसा सरस्वतीडा देवी भारती विश्वतूर्तिः ॥४३॥
त्वष्टा दधच्छुष्ममिंद्राय वृष्णेपाकोचिष्टुर्यशसे पुरूणि । वृषा यजन्वृषणं भूरि
रेता मूर्द्धन्यज्ञस्य समनक्तु देवान् ॥४४॥ वनस्पतिरवसृष्टो न पाशैस्त्मन्या
समंजञ्छमिता न देवः । इंद्रस्य हव्यैर्जठरं पृणानः स्वदाति यज्ञं मधुना घृते
न ॥४५॥ स्तोकानामिंदुं प्रति शूर इंद्रो वृषायमाणो वृषभस्तुराषाट् । घृतप्रुषा
मनसा मोदमानाः स्वाहा देवा अमृता मादयंताम् ॥४६॥ आयात्विंद्रोवस

उपनऽइंद्रस्तुतःसधमादस्तस्मरः॥वाच्यथान्नस्त्वंविंषीयेस्यपूर्वाचिर्निर्भत्रमभिम
निपुष्यात्॥२२॥आनऽइंद्रोदूरादानऽआसादभिष्टिकृदवसेयासदुग्रः॥ओजि
ष्ठेभिर्नृपतिर्वज्रबाहुःसंगेसमत्सुतुर्वणिःपृतन्यून्॥२३॥आनऽइंद्रोहरिभि
र्यात्वच्छार्वाचीनोवसेराधसेच॥तिष्ठातिवज्रीमघवाविरप्शीमंयज्ञमनुनोवा
॥१२॥ जसातौ॥२४॥त्रातारमिंद्रमवितारमिंद्रंहवेहवेसुहवंशूरमिंद्रम्॥ह्वयामि
शक्रंपुरुहूतमिंद्रंस्वस्तिनोमघवाधात्विंद्रः॥२५॥इंद्रःसुत्रामास्ववाँऽअ ॥१२॥
वोभिःसुमृडीकोभवतुविश्ववेदाः॥बाधतांद्वेषोऽअभयंकृणोतुसुवीर्यस्यप
तयस्याम॥२६॥तस्यवयंसुमतौयज्ञियस्यापिभद्रेसौमनसेस्याम॥स

सू ॥२॥

तु ग्रामं स्ववं इंद्रोऽअस्मे॥ऽआराच्चिद्द्वेषः सनुतर्युयोतु॥३७॥आमंद्रैरिंद्र हरिभि
र्याहि मयूररोमभिः॥मा त्वा केचिन्नियमन्विन्न पाशिनोति धन्वेव तां २ इहि॥३८॥
एवेदिंद्रं वृषणं वज्रबाहुं वसिष्ठासोऽअभ्यर्चंत्यर्कैः॥स न स्तुतो वीरवद्धातु गोम
द्यूयं पात स्वस्तिभिः सदा नः॥३९॥समिद्धोऽअग्निरश्विना तप्तो घर्मो विराट्सुतः॥
दुहे धेनुः सरस्वती सोमं शुक्रमिहेंद्रियम्॥४०॥तनूपा भिषजा सुतेश्विनोभा स
रस्वती॥मध्वा रजांसींद्रियमिंद्राय पथिभिर्वहान्॥४१॥इंद्रायेंदुं सरस्वतीन
राशंसेन नग्नहुं॥अधातामश्विना मधु भेषजं भिषजा सुते॥४२॥आजुह्वा
ना सरस्वतींद्रायेंद्रियाणि वीर्यम्॥इडाभिरश्विनाऽइषं समूर्जं सं रयिं द

धुः॥५८॥अश्विना नमुचेः सुतꣳ सोमꣳ शुक्रं परिस्रुता॥ सरस्वती तमाभरद्बर्हिषेंद्राय पा-
तवे॥५९॥कवष्यो न व्यचस्वतीरश्विभ्यां न दुरो दिशः॥ इंद्रो न रोदसी उभे दुहे कामांत्स-
रस्वती॥६०॥उषासानक्तमश्विना दिवेंद्रꣳ सायमिंद्रियैः॥ संजानाने सुपेशसा समंज-
ते सरस्वत्या॥६१॥पातं नोऽअश्विना दिवा पाहि नक्तꣳ सरस्वति॥ दैव्या होतारा भिष-
जा पातमिंद्रꣳ सचा सुते॥६२॥तिस्रस्त्रेधा सरस्वत्यश्विना भारतीडा॥ तीव्रं परिस्रु-
ता सोममिंद्राय सुषुवुर्मदम्॥६३॥अश्विना भेषजं मधु भेषजं नः सरस्वती॥ इंद्रे त्वष्टा
यशः श्रियꣳ रूपꣳ रूपमधुः सुते॥६४॥ऋतुथेंद्रो वनस्पतिः शशमानः परिस्रुता॥ की-
लालमश्विभ्यां मधु दुहे धेनुः सरस्वती॥६५॥गोभिर्न सोममश्विना मासरेण परिस्रुता॥

सम्मधातꣳ सरस्वत्या सहेन्द्रे सुतं मधु ॥५१॥ अश्विना हविरिंद्रियं नमुचेर्द्धिया सरस्वती
आशुक्रमासुराद्वसु मघमिंद्राय जभ्रिरे ॥५२॥ यमश्विना सरस्वती हविषेंद्रमवर्द्धय
न्॥ स बिभेद वलं मघं नमुचाऽवासुरे सचा ॥५३॥ तमिंद्रं पशवः सचाश्विनोभा स
रस्वती॥ दधानाऽअभ्यनूषत हविषा यज्ञऽइंद्रियैः॥ ५४॥ यऽइंद्रऽइंद्रियं दधुः सवि
ता वरुणो भगः॥ स सुत्रामा हविष्पतिर्यजमानाय सश्चत॥ ५५॥ सविता वरुणो दध
द्यजमानाय दाशुषे॥ आदत्त नमुचेर्वसु सुत्रामा बलमिंद्रियम्॥ ५६॥ वरुणः क्षत्रमिं
द्रियं भगेन सविता श्रियम्॥ सुत्रामा यशसा बलं दधाना यज्ञमाशत॥ ५७॥ अश्वि
ना गोभिरिंद्रियमश्वेभिर्वीर्यं बलम्॥ हविषेंद्रꣳ सरस्वती यजमानमवर्द्धयन्॥ ५८॥

तानासत्यासुपेशसाहिरंण्यवर्तनीनरा॥सरस्वतीहविष्मतींद्रकर्मसुनोवत॥७९॥
ताभिषजासुकर्मणासासुदुघासरस्वती॥सवृत्रहाशतक्रतुरिंद्रायदधुरिंद्रियम्॥८०॥
युवंसुराममश्विनानमुचावासुरेसचा॥विपिपानाःसरस्वतींद्रंकर्मस्वावत॥८१॥
पुत्रमिवपितरावश्विनोभेंद्रावथुःकाव्यैर्दंसनाभिः॥यत्सुरामंव्यपिबःशचीभिः
॥१२५॥ रस्वतीत्वामघवन्नभिष्णक्॥८२॥यस्मिन्नश्वासऋषभासउक्षणोवशामेषाअवसृ ॥१२८॥
ष्टासआहुताः॥कीलालपेसोमपृष्ठायवेधसेहृदामतिंजनयचारुमग्नये॥८३॥अ
हाव्यग्नेहविरास्येतेस्रुचीवघृतंचम्वीवसोमः॥वाजसनिंरयिमस्मेसुवीरंप्रशस्तं
धेहियशसंबृहंतम्॥८४॥अश्विनातेजसाचक्षुःप्राणेनसरस्वतीवीर्यम्॥वाचेंद्रोब
लेनेंद्रायदधुरिंद्रियम्॥८५॥गोमदूषुनासत्याश्वावद्यातमश्विना॥वर्तीरुद्रानृपाय्यम्॥८६॥

नय। स्परोनां नरऽआदधर्षद्वृषपर्वस्तु॥ दुःशाऽऽस्सोमस्यौरिपुः॥ ६७॥ नानाऽऽबोल्हमश्विना
रयिं पित्रींइं॰ सं ह्रत्राम्॥ धि छ्याविरि वोधिदम्॥ ६८॥ पावकानः सरस्वती वाजेभिर्वाजिनी
वती॥ यज्ञं वष्टु धियावसुः॥ ६९॥ चोदयित्री सूनृतानां चेतंती सुमतीनाम्॥ यज्ञं दधे
सरस्वती॥ ७०॥ महोऽअर्णः सरस्वती प्रचेतयति केतुना॥ धियो विश्वा विराजति॥ ७१॥
इंद्रायाहि चित्रभानो सुताऽइमे त्वायवः॥ अण्वीभिः स्तनापूतासः॥ ७२॥ इंद्रायाहि
धियेषितो विप्रजूतः सुतावतः॥ उप ब्रह्माणि वाघतः॥ ७३॥ इंद्रायाहि तूतुजानऽ
प ब्रह्माणि हरिवः॥ सुते दधिष्व नश्चनः॥ ७४॥ अश्विना पिबतां मधु सरस्वत्या स
जोषसा॥ इंद्रः सुत्रामा वृत्रहा जुषंताऽऽसोम्यं मधु॥ ७५॥ ॥ ७॥ ॥ ॥ ॥ ७ ॥ ॥

यद्देवा॰ २ अभ्यादधामि॰ ८ घोभूतानां॰ ४ समिद्धः ३ ॥११॥ आ यातु॰ ८ समिद्धि॰ अग्नि॰ २ अग्निना
हवि॰ ३ अग्निस्तेजसा ॥११॥ अष्टानुक॥ कंडिकासंख्या ॥७५॥ द्वाविंशतितमोध्यायः ॥
॥ ॐ म ॥ इमं मे॰ वरुण श्रुधी हवमद्या च मृळय ॥ त्वामवस्युराचके ॥१॥ तत्त्वा॰ यामि
ब्रह्मणा वंदमानस्तदाशास्ते यजमानो हविर्भिः ॥ अहेळमानो वरुणेह बोध्युरुशंऽ
॥१६॥ स मा नऽआयुः प्रमोषीः ॥२॥ त्वन्नोऽअग्ने वरुणस्य विद्वान्देवस्य हेळोऽअवया ॥१६॥
सिसीष्ठाः ॥ यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांऽसि प्रमुमुग्ध्यस्मत् ॥३॥
स त्वन्नोऽअग्नेवमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ ॥ अव यक्ष्व नो वरुण
ण२ रराणो वीहि मृळीकं सुहवो नऽएधि ॥४॥ महीमू षु मातरं सुव्रतानाम्

तस्य पत्नीमवसे हुवेम। तुविक्षत्रामजरन्तीमुरूचीꣳ सुशर्माणमदितिꣳ सुप्रणीतिम्॥५॥
सुत्रामाणं पृथिवीं द्यामनेहसꣳ सुशर्माणमदितिꣳ सुप्रणीतिम्॥ दैवीं नावꣳ स्वरित्रा
मनागसमस्रवन्तीमारुहेमा स्वस्तये॥६॥ सुनावमारुहेयमस्रवन्तीमनागसम्। शतारि
त्राꣳ स्वस्तये॥७॥ आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्। मध्वा रजाꣳसि सुक्रतू॥८॥
प्र बाहवा सिसृतं जीवसे नऽआ नो गव्यूतिमुक्षतं घृतेन॥ आ मा जने श्रवयतं युवाना
श्रुतं मे मित्रावरुणा हवेमा॥९॥ शन्नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः। जं
भयन्तोऽहिं वृकꣳ रक्षाꣳसि सनेम्यस्मद्युयवन्नमीवाः॥१०॥ ते नोऽअर्वन्तो हवनश्रुतो हवं
विश्वे शृण्वन्तु वाजिनो मितद्रवः॥ सहस्रसा मेधसाता सनिष्यवो महो ये धनꣳ समिथेषु
जभ्रिरे॥११॥ वाजे वाजेऽवत वाजिनो नो धनेषु विप्राऽअमृताऽऋतज्ञाः॥ अस्य म

धः पिबतमादयध्वंतृप्तायातनपथिभिर्द्देवयानैः ॥१॥ समिद्धोऽग्निः समिधासुस-
मिद्धो वरेण्यः ॥ गायत्री छंद इंद्रियं त्र्यविर्गौर्वयो दधुः ॥२॥ तनूनपाच्छुचिव्र-
तस्तनूपाश्च सरस्वती ॥ उष्णिहा छंद इंद्रियं दित्यवाड्गौर्वयो दधुः ॥३॥ इळा-
भिरग्निरीड्यः सोमो देवो अमर्त्यः ॥ अनुष्टुप् छंद इंद्रियं पंचाविर्गौर्वयो दधुः ॥४॥
॥१७॥ सुबर्हिरग्निः पूषण्वान्स्तीर्णबर्हिरमर्त्यः ॥ बृहती छंद इंद्रियं त्रिवत्सो गौर्वयो द- ॥१७॥
धुः ॥५॥ दुरो देवीर्दिशो महीर्ब्रह्मा देवो बृहस्पतिः ॥ पङ्क्तिश्छंद इहेंद्रियं तुर्य-
वाड्गौर्वयो दधुः ॥६॥ उषे यह्वी सुपेशसा विश्वे देवा अमर्त्याः ॥ त्रिष्टुप् छंद इहें-
द्रियं पष्ठवाड्गौर्वयो दधुः ॥७॥ दैव्या होतारा भिषजेंद्रेण सयुजा युजा ॥ जगती

छंदऽइंद्रियमनड्वान्गौर्वयोदधुः॥१९॥तिस्रऽइडासरस्वती भारतीमरुतोविशः॥
विराड्छंदऽइहेंद्रियंधेनुर्गौर्नवयोदधुः॥२०॥त्वष्टातुरीपोऽअद्भुतऽइंद्राग्नी
पुष्टिवर्द्धना॥द्विपदाछंदऽइंद्रियमुक्षागौर्नवयोदधुः॥२१॥शमितानोवनस्प
तिःसविताप्रसुवन्भगम्॥ककुप्छंदऽइहेंद्रियंवशावेहद्वयोदधुः॥२२॥स्वा
हायज्ञंवरुणःसुक्षत्रोभेषजंकरत्॥अतिछंदाऽइंद्रियंबृहदृषभोगौर्वयो
दधुः॥२३॥वसंतेनऽऋतुनादेवावसवस्त्रिवृतास्तुताः॥रथंतरेणतेजसा
हविरिंद्रेवयोदधुः॥२४॥ग्रीष्मेणऽऋतुनादेवारुद्राःपंचदशेस्तुताः॥बृहताय
शसाबलंऽइहविरिंद्रेवयोदधुः॥२५॥वर्षाभिर्ऋतुनादित्यास्तोमेसप्तदशे

स्तुताः॥ वैरूपेण विशौजसा सह हविरिंद्रे वयो दधुः॥ २४॥ शारदेन ऋतुना देवा एकविंश
ऋऽभवे स्तुताः॥ वैराजेन श्रिया श्रियꣳ हविरिंद्रे वयो दधुः॥ २५॥ हेमंतेन ऋतु
ना देवास्त्रिणवे मरुत स्तुताः॥ बलेन शक्वरीः सहो हविरिंद्रे वयो दधुः॥ २६॥ शै
शिरेणऽ ऋतुना देवास्त्रयस्त्रिꣳशे ऽमृता स्तुताः॥ सत्येन रेवतीः क्षत्रꣳ हविरिंद्रे
॥१८॥ वयो दधुः॥ २७॥ ७॥ होता यक्षत्समिधाग्निमिडस्पदे ऽश्विनेंद्रꣳ सरस्वतीमजो धू ॥१८॥
म्रो न गोधूमैः कुवलैर्भेषजं मधु॥ शष्पैर्न तेज इंद्रियं पयः सोमः परिस्रुता घृतं मधु
व्यंत्वाज्यस्य होतर्यज॥ २८॥ होता यक्षत्तनूनपात्सरस्वतीमविर्मेषो न भेषजꣳ प
था मधुमता भरन्नश्विनेंद्राय वीर्यं॥ बदरैरुपवाकाभिर्भेषजं तोक्मभिः पयः सो

ॐ

ति: पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥३१॥ होता यक्षन्नराशं
संसं न नग्नहुं पतिं सुरया भेषजं मेषः सरस्वती भिषग्रथो न चन्द्र्यश्विनोर्वपाऽइन्द्र
स्य वीर्यम् । बदरैरूपवाकाभिर्भेषजं तोक्मभिः पयः सोमः परिस्रुता घृतं मधु व्य
न्त्वाज्यस्य होतर्यज ॥३२॥ होता यक्षदीडे ईडितऽआजुह्वानः सरस्वतीमिन्द्रं ब
लेन वर्द्धयन्नृषभेण गवेन्द्रियमश्विनेन्द्राय भेषजम् । यवैः कर्कन्धुभिर्मधु लाजैर्न
मासरं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥३३॥ होता यक्षद्बर्हि
रूर्णम्रदा भिषङ्नासत्या भिषजाश्विनाश्वा शिशुमती भिषग्धेनुः सरस्वती भि
षग्दुहऽइन्द्राय भेषजं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥३४॥

होतायक्षद्दुरोदिशः कवष्यानव्यचस्वतीरश्विभ्यांनदुरोदिशऽइंद्रोनरोदसीदुघे
दुहेधेनुःसरस्वत्यश्विनेंद्रायभेषजंशुक्रंन्नज्योतिरिंद्रियंपयःसोमःपरि
स्रुताघृतंमधुव्यंत्वाज्यस्यहोतर्यज॥३५॥होतायक्षत्सुपेशसोषेनक्तंदिवाश्वि
नासमंजातेसरस्वत्यात्विषिमिंद्रेनभेषजं॥श्येनोनरजसाहृदाश्रियानमा
॥१८॥ सरंपयःसोमःपरिस्रुताघृतंमधुव्यंत्वाज्यस्यहोतर्यज॥३६॥होतायक्षद्दैव्याहो ॥१८॥
तारामिषजाश्विनेंद्रंनजागृविदिवानक्तंनभेषजैः॥शूषंसरस्वतीभिषक्सीसेनदु
हऽइंद्रियंपयःसोमःपरिस्रुताघृतंमधुव्यंत्वाज्यस्यहोतर्यज॥३७॥होतायक्षत्ति
स्रोदेवीर्नभेषजंत्रयस्त्रिधातवोपसोरूपमिंद्रेहिरण्ययमश्विनेळानभारती॥वा

चुरोगिरिष्ठाः॥यस्योरुषुत्रिषुविक्रमणेष्वधिक्षियंतिभुवनानिविश्वा॥२०॥विष्णोररराटम
सिविष्णोःश्नप्त्रेस्थोविष्णोस्यूरसिविष्णोर्ध्रुवोसि॥वैष्णवमसिविष्णवेत्वा॥२१॥देवस्य
त्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम्॥आददेनार्यसीदमहꣳरक्षसोग्रीवा
अपिकृंतामि॥बृहन्नासिबृहद्रवाबृहतीमिंद्रायवाचंवद॥रक्षोहणंवलगहनंवैष्णवीम्॥इ
दमहंतंवलगमुद्वपामियन्मेनिष्ट्योयममात्योनिचखान॥इदमहंतंवलगमुद्वपामियन्मे
समानोयमसमानोनिचखान॥इदमहंतंवलगमुद्वपामियन्मेसबंधुर्यमसबंधुर्निचखा
न॥इदमहंतंवलगमुद्वपामियन्मेसजातोयमसजातोनिचखान॥उत्कृत्यांकिरामि॥२२॥स्वरा
डसि॥सपत्नहासत्रराडस्यभिमातिहा॥जनराडसिरक्षोहासर्वराडस्यमित्रहा॥२३॥

मि२

र्विचक्रमे त्रेधा निदधे पदम् ॥ समूढमस्य पांसुरे स्वाहा ॥ २० ॥ इरावती धेनुम
ती हि भूतं सूयवसिनी मनवे दशस्या ॥ व्यस्कभ्ना रोदसी विष्णएते दाधर्थ पृथिवीम
भितो मयूखैः स्वाहा ॥ २१ ॥ देवश्रुतौ देवेष्वाघोषतम् ॥ प्राची प्रेतमध्वरं कल्पयन्ती ऊर्ध्वं य
ज्ञं नयतं मा जिह्वरतम् ॥ स्वं गोष्ठमा वदतं देवी दुर्ये आयुर्मा निर्वादिष्टं प्रजां मा निर्वादि
ष्टम् ॥ अत्र रमेथां वर्ष्मन्पृथिव्याः ॥ २३ ॥ विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विमम
े रजांसि ॥ यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवे त्वा ॥ २४ ॥
दिवो वा विष्ण उत वा पृथिव्या महो वा विष्ण उरोरन्तरिक्षात् ॥ उभा हि हस्ता वसुना पृण
स्वा प्रयच्छ दक्षिणादोत सव्याद्विष्णवे त्वा ॥ २५ ॥ प्रतद्विष्णुः स्तवते वीर्येण मृगो न भीमः कु

पी॥ येसिंहग्रुधासिसपत्नसाहीदेवेभ्यःकल्पस्वसिंह्यसिसपत्नसाहीदेवेभ्यःशुंधस्वसिंह्य
सिसपत्नसाहीदेवेभ्यःशुंभस्व॥१४॥इंद्रघोषस्त्वा॥वसुभिःपुरस्तात्पातुप्रचेतास्त्वारुद्रैःपश्चा
त्पातु॥मनोजवास्त्वापितृभिर्दक्षिणतःपातुविश्वकर्मात्वादित्यैरुत्तरतःपातु॥१५॥इदमहंतप्तं
वार्बहिर्धायज्ञान्निःसृजामि॥सिंह्यसिस्वाहासिंह्यस्यादित्यवनिस्वाहा॥१६॥सिंह्य
॥२७॥ सि॥ब्रह्मवनिःक्षत्रवनिःस्वाहासिंह्यसिसुप्रजावनीरायस्पोषवनिःस्वाहा॥सिंह्यस्याव
हदेवान्यजमानायस्वाहाभूतेभ्यस्त्वा॥१७॥ध्रुवोसिपृथिवींदृंहध्रुवक्षिदस्यंतरिक्षंदृंह॥ ॥२७॥
अच्युतक्षिदसिदिवंदृंहाग्नेर्भस्मास्यग्नेःपुरीषमसि॥१८॥युंजतेमनउतयुंजतेधियोवि
प्राविप्रस्यबृहतोविपश्चितः॥विहोत्रादधेवयुनाविदेकइन्महीदेवस्यसवितुःपरिष्टुतिः॥१९॥
ह

मो दिवे नमः पृथिव्यै ॥१॥ या ते अग्ने यःश्या तनूर्वर्षिष्ठा गह्वरेष्ठा ॥ उग्रं वचो अपावधीं त्वेषं व
चो अपावधीं स्वाहा ॥ या ते अग्ने रजःश्या तनूर्वर्षिष्ठा गह्वरेष्ठा ॥ उग्रं वचो अपावधीं त्वेषं व
चो अपावधीं स्वाहा ॥ या ते अग्ने हरीश्यायात या तनूर्वर्षिष्ठा गह्वरेष्ठा ॥ उग्रं वचो अपावधीं त्वे
षं वचो अपावधीं स्वाहा ॥१२॥ तप्तायनी मे ऽसि वित्तायनी मे ऽसि ॥ अवतान्मा व्यथितम वतान्मा
नाथितम् ॥१३॥ विदेरग्नेर्नभो नामाग्ने अङ्गिरआयुना नाम्नेहि ॥ यो ऽस्यां पृथिव्यामसि यत्ते
ऽनाधृष्टं नाम यज्ञियं तेन त्वा दधे ॥ विदेरग्नेर्नभो नामाग्ने अंगिरआयुना नाम्नेहि ॥ यो द्विती
यस्यां पृथिव्यामसि यत्तेऽनाधृष्टं नाम यज्ञियं तेन त्वा दधे ॥ विदेरग्नेर्नभो नामाग्ने अङ्गिरआ
युना नाम्नेहि ॥ यस्तृतीयस्यां पृथिव्यामसि यत्तेऽनाधृष्टं नाम यज्ञियं तेन त्वा दधे ॥ अनु त्वा देव

रति प्रविष्टऽऋषीणां पुत्रोऽअभिशस्तिपावा॥ स नः स्योनः सुयजा यजेह देवेभ्यो हव्यꣳ स
दमप्रयुच्छन्त्स्वाहा॥४॥ आपतये त्वा गृह्णामि परिपतये त्वा गृह्णामि॥ तनूनप्त्रे शाक्वराय श
क्मन ओजिष्ठाय॥५॥ अनाधृष्टमस्यनाधृष्यं देवानामोजः॥ अनभिशस्त्यभिशस्तिपाऽअन
भिशस्तेन्यम्॥६॥ अंजसा सत्यमुपगेषꣳ स्विते मा धाः॥ अग्ने व्रतपास्त्वे व्रतपाः॥७॥ या त
॥१९॥ वा तनूरियꣳ सा मयि यो मम तनूरेषा सा त्वयि॥ सह नौ व्रतपते व्रतान्यनु मे दीक्षां दीक्षाप ॥१९॥
तिर्मन्यतामनु तपस्तपस्पतिः॥८॥ अꣳशुरꣳशुष्टे। देव सोमाप्यायतामिंद्रायैकधनविदे॥
आ तुभ्यमिंद्रः प्यायतामा त्वमिंद्राय प्यायस्व॥९॥ आप्यायया स्मान्त्सखीन्त्सन्या मेधया॥
स्वस्ति ते देव सोम सुत्यामशीय॥१०॥ एष्टा रायः प्रेषे भगाय॥ ऋतमृतवादिभ्यो नम

वरुणस्य स्कंभर्जैसनीस्थः॥ वरुणस्यऋतसदन्यसि वरुणस्यऋतसदनमसि वरुणस्यऋत
सदनीमासीद॥३६॥ याते धामानि हविषा यजंति ताते विश्वा परिभूरस्तु यज्ञं॥ गयस्फानः प्र
तरणः सुवीरोवीरहा प्रचरा सोम दुर्यान्॥ ॥७९॥ ॥एदं ७ आकूत्यै २ मक्षामयोः ४ युंजतं क्रतु
ता ९ एषते ५ वस्व्यसि ८ एषते ४ चंद्रेला द अदित्यास्त्व ॥ ७॥ इति चतुर्थोध्यायः॥ ॥श्री॥ ॥२
ॐ नमः॥ अग्नेस्तनूरसि विष्णवे त्वा सोमस्य तनूरसि विष्णवे त्वा॥ अतिथेरातिथ्यमसि वि
ष्णवे त्वा श्येनाय त्वा सोमभृते विष्णवे त्वाग्नये त्वा रायस्पोषदे विष्णवे त्वा॥१॥ अग्नेर्जनित्र
मसि वृषणौ स्थः॥ उर्वश्यस्यायुरसि पुरूरवा असि॥ गायत्रेण त्वा छंदसा मंथामि त्रैष्टुभे
न त्वा छंदसा मंथामि जागतेन त्वा छंदसा मंथामि॥२॥ भवतन्नः समनसौ सचेतसा अरे
पसौ॥ मा यज्ञं हिंसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः॥३॥ अग्नावग्निश्च

आसीद्दिभ्यासुवनानिसंग्राभ्रिश्चेत्तानिवरुणस्यव्रतानि॥३०॥वनेषुव्यंतरिक्षंततानवा
जमर्वत्सुपयउस्त्रियासु॥हृत्सुक्रतुंवरुणाविक्ष्वग्निंदिविसूर्यमदधात्सोममद्रौ॥३१॥सू
र्यस्यचक्षुरारोहाग्नेरक्ष्णःकनीनकम्॥यत्रैतशेभिरीयसेभ्राजमानोविपश्चिता॥३२॥
उस्त्रावेतंधूर्षाहौयुज्येथामनश्रूअवीरहणौब्रह्मचोदनौ॥स्वस्तियजमानस्यगृहान्गछ
तम्॥३३॥भद्रोमेसिप्रच्यवस्वभुवस्पतेविश्वान्यभिधामानि॥मात्वापरिपरिणोविदन्मा
॥१८॥ त्वापरिपंथिनोविदन्मात्वावृकाअघायवोविदन्॥श्येनोभूत्वापरापतयजमानस्यगृहा ॥१८॥
न्गछतन्नौसंस्कृतम्॥३४॥नमोमित्रस्यावरुणस्यचक्षसेमहोदेवायतदृतंसपर्य
त॥दूरेदृशेदेवजातायकेतवेदिवस्पुत्रायसूर्यायशंसत॥३५॥वरुणस्योत्तंभनमसि

व्रतपा असि देव आ मर्त्येष्वा॥ त्वं यज्ञेष्वीड्यः॥२१॥ रास्वेयत्सोमा भूयो भर॥ देवो नः सविता
सोर्हिताव स्वदात्॥२२॥ क्षु॥ एषा ते शुक्र तनूरेतद्वर्चस्तया संभव भ्राजं गच्छ॥ जूरसि धृता
मनसा जुष्टा विष्णवे॥२३॥ तस्यास्ते सत्यसवसः प्रसवे तन्वो यन्त्रमशीय स्वाहा॥ चंद्रमसि शुक्र
मस्यमृतमसि वैश्वदेवमसि॥२४॥ चिदसि मनासि धीरसि दक्षिणासि क्षत्रियासि यज्ञिया
स्यदितिरस्युभयतः शीर्ष्णी॥ सा नः सुप्राची सुप्रतीची भव॥२५॥ मित्रस्त्वा पदि बध्नीतां पूषा
ध्वनस्पात्विन्द्रायाध्यक्षाय॥ अनु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्योनु सखा सयू
थ्यः॥२६॥ सा देवि देवमच्छेहीन्द्राय सोमं॥ रुद्रस्त्वा वर्त्तयतु स्वस्ति सोमसखा पुनरेहि॥
॥२७॥ छ॥ वस्व्यस्यदितिरस्यादित्यासि रुद्रासि चन्द्रासि॥ बृहस्पतिष्ट्वा सुम्ने रम्णातु रु

ष्टोवनस्पतिर्यज्ञियः॥४॥ देवींधियंमनामहेसुमृळीकामभिष्टये॥ वर्चोधांयज्ञवाहसं
सुतीर्थानोअसद्वशे॥५॥ येदेवामनोजातामनोयुजोदक्षक्रतवः॥तेनोवंतुतेनःपांतु
तेभ्यःस्वाहा॥६॥ श्वात्राःपीताभवतयूयमापोअस्माकमंतरुदरेसुशेवाः॥ताअस्मभ्यमय
क्ष्माअनमीवाअनागसःस्वदंतुदेवीरमृताऋतावृधः॥७॥ इयंते।यज्ञियातनूरपोमुंचामि
नप्रजाम्॥अंहोमुचःस्वाहाकृताःपृथिवीमाविशतपृथिव्यासंभव॥८॥ अग्नेत्वंसुजा
॥२६॥ गृहिवयंसुमंदिषीमहि॥रक्षाणोअप्रयुच्छन्प्रबुधेनःपुनस्कृधि॥९॥ पुनर्मनः [illegible] ॥२६॥
र्मआगात्पुनश्चक्षुःपुनःश्रोत्रंमआगात्॥पुनःप्राणःपुनरात्मामआगात्॥वैश्वानरो
अदब्धस्तनूपाअग्निर्मापातुदुरितादवद्यात्॥१०॥ त्वमग्ने। [illegible]

आकूत्यै प्रयुजे ग्नये स्वाहा मेधायै मनसे ग्नये दीक्षायै तपसे ग्नये स्वाहा [illegible] ये
ग्नये स्वाहा॥ आपो देवीर्बृहतीर्विश्वशंभुवो द्यावापृथिवी उर्वंतरिक्ष॥ बृहस्पतये हविषा
विधेम स्वाहा॥ ९॥ विश्वो देवस्य नेतुर्मर्त्तो वुरीत सख्यं॥ विश्वो राय इषुध्यति द्युम्नं वृणी
त पुष्यसे स्वाहा॥ ८॥ ऋक्सामयोः शिल्पे स्थस्ते वामारभे ते मा पातम्॥ आस्य यज्ञस्योद
चः॥ १०॥ शर्म्मासि शर्म्म मे यच्छ नमस्ते अस्तु मा मा हिंसीः॥ ऊर्ग्गस्यांगिरस्यूर्ण्णम्रदा
ऊर्ज्जं मे यच्छ॥ ११॥ सोमस्य नीविरसि [illegible] विष्णोः शर्म्मासि शर्म्म यजमानस्य॥ इंद्र
स्य योनिरसि सुसस्याः कृषीस्कृधि॥ १२॥ उच्छ्रयस्व वनस्पत ऊर्ध्वो मा पाह्यंहसः॥
आस्य यज्ञस्योदृचः॥ १३॥ ७॥ व्रतं कृणुत॥ व्रतं कृणुत व्रतं कृणुत॥ अग्निर्ब्रह्माग्निर्य

[OrderDescription]
,CREATED=06.01.20 15:44
,TRANSFERRED=2020/01/06 at 15:53:20
,PAGES=45
,TYPE=STD
,NAME=S0002459
,Book Name=M-2599-PADPATH YAJUVED
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF

FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF

FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF

FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,